# Shaktipanchakshara Stuti

# શક્તિપઞ્ચાક્ષરસ્તુતિઃ

## Document Information

Text title : Shaktipanchakshara Stuti

File name : shaktipanchAkSharastutiH.itx

Category : shiva, devI, stuti

Location : doc_shiva

Author : maNivAchaka

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શક્તિપઞ્ચાક્ષરસ્તુતિઃ

શ્રીમણિવાચકકૃતા

(ૐ નમઃ શિવાય હ્રીં શ્રીં ।)

ઓઙ્કારવર્ણવરમન્દિરમધ્યગાય
    ઓઙ્કારસંસ્તુતનિજામલ કીર્તનાય ।
ઓઙ્કારમધ્યસદનાશ્રિતપાદુકાય
    ઓઙ્કારપીઠનટનાય નતોઽસ્મિ તુભ્યમ્ ॥ ૧॥

નાનાચરાચરજનાન્તર સંસ્થિતાય
    નાગારિવાહનદૃગમ્બુજપૂજિતાય ।
નાગેન્દ્રહસ્તજલસિક્તજટાતટાય
    નન્દીકૃતાત્મનટનાય નતોઽસ્મિ તુભ્યમ્ ॥ ૨॥

મન્દાનુજાલિવર કેલિસભાજટાય
    માલાકરામલમનોગતપાદુકાય ।
મન્ત્રાત્મકાય મલહીનદ્વિજાર્ચિતાય
    મન્દારભૂમિનટનાય નતોઽસ્મિ તુભ્યમ્ ॥ ૩॥

શિવાકૃતાશ્વનિચયાય શિવાભિધાય
    શિઞ્જાનલાઞ્છનલસચ્છુભનૂપુરાય ।
શિલાસુમાર્પણચણાય મુદઙ્કુરાય
    શિવપ્રદાત્મનટનાય નતોઽસ્મિ તુભ્યમ્ ॥ ૪॥

વાણીશવાગ્ભવતુરઙ્ગમવાહનાય
    વાણીવિલાસદ-નિજાઙ્ઘ્રિસરોજભાજે ।
વન્દીકરામલકૃતાતુલપિષ્ટજાલૈઃ
    વશીકૃતાત્મનટનાય નતોઽસ્મિ તુભ્યમ્ ॥ ૫॥

યમાનુજાજલનિમગ્નનૃપાર્ચિતાય
    યન્તુઃશિરશ્શકલભૂષણભૂષિતાય ।

યમાદિયોગમૃગિતામલપાદુકાય
    યતીશચિત્તનટનાય નતોઽસ્મિ તુભ્યમ્ ॥ ૬॥

હ્રીઙ્કારમન્ત્રસુમમાક્ષિકનામધેયાં
    હ્રીઙ્કારસત્વપદવીં મુનિસેવ્યમાનામ્ ।
હ્રીઙ્કારમન્ત્રનુતપાદસરોજયુગ્માં
    હ્રીઙ્કારમન્ત્રતનુમાકલયામિ ચિત્તે ॥ ૭॥

શ્રીસઙ્ઘદાનચણચિત્રચરિત્રજાલાં
    શ્રીનાથમુખ્યનિમિષેતર સન્નુતાં તામ્ ।
શ્રીમત્કુલાચલસુતાં શિવકામિનામ્નીં
    શ્રીશઙ્કરાઙ્કનિલયાં સતતં નતોઽસ્મિ ॥ ૮॥

માણિક્યવાચકકૃતસ્તવમદ્ભુતં યઃ
    પૂજાવસાનસમયે પઠતીશભક્તઃ ।
તસ્યેષ્ટવાક્સિદ્ધિધનાદિમાર્થાન્
    સદ્યો દદાતિ નિતરાં નટરાજરાજઃ ॥ ૯॥

ઇતિ શ્રીમણિવાચકકૃતા શક્તિપઞ્ચાક્ષરસ્તુતિઃ સમાપ્તા ।

Proofread by Aruna Narayanan

*Shaktipanchakshara Stuti*
pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*